VEDA UNION

# CAMAKAM

Camakam Anuvāka 1 - 11

Devanāgarī, transliteration and translation text.
Also includes a text with phonetic changes of anusvāra and visarga.

*Translations and additional commentaries by Dr. R.L. Kashyap from SAKSI (Sri Aurobindo Kapali Sastry Institute of Vedic Culture), Bangalore, India.*

# Anuvāka 1

*In this first anuvāka, the powers to be manifested in the sacrificer are the physical, vital and mental powers, primarily those associated with prāṇa or life energy. These powers are needed for successful completion of the many types of work encountered in everyday life. They include will-power, effort, the powers of breath like prāṇa, apāna, vyāna, well-developed body with healthy limbs, bones, joints, etc. The prayer is that all these powers be perfectly manifested in us in complete harmony with each other.*

1 अग्ना॑विष्णू स॒जोष॑से॒माव॑र्धन्तु वां॒ गिर॑ः ।

agnā̍viṣṇū sa̱joṣa̍se̱māva̍rdhantu vā̱ṁ gira̍ḥ |

*O Agni and Viṣṇu, may these Words gladden you in unison;*

2 द्यु॒म्नैर्वाजे॑भि॒राग॑तम् ॥

dyu̱mnairvāje̍bhi̱rāga̍tam ||

*you come with radiance and plenitude.*

3 वाज॑श्च मे प्रस॒वश्च॑ मे॒ प्रय॑तिश्च मे॒

vāja̍śca me prasa̱vaśca̍ me̱ praya̍tiśca me̱

*Plentiful resources of many types, origination, effort, (may all these powers develop perfectly) in me;*

4 प्रसि॑तिश्च मे धी॒तिश्च॑ मे॒ क्रतु॑श्च मे॒

prasi̍tiśca me dhī̱tiśca̍ me̱ kratu̍śca me̱

*inclination, thought, will-power,*

5 स्वर॑श्च मे॒ श्लोक॑श्च मे श्रा॒वश्च॑ मे॒

svara̍śca me̱ śloka̍śca me śrā̱vaśca̍ me̱

*speech, fame, renown,*

6 श्रुति॑श्च मे॒ ज्योति॑श्च मे॒ सुव॑श्च मे

śruti̍śca me̱ jyoti̍śca me̱ suva̍śca me

*revelation, light, world of light,*

7 प्रा॒णश्च॑ मेऽपा॒नश्च॑ मे व्या॒नश्च॒ मेऽसु॑श्च मे चि॒त्तं च॑ म॒

prā̱ṇaśca̍ me'pā̱naśca̍ me vyā̱naśca̱ me'su̍śca me ci̱ttaṁ ca̍ ma̱

*(main breath) prāṇa, apāna (downward breath), vyāna (distributing breath), life-force, consciousness,*

8 आधी॑तं च मे॒ वाक्च॑ मे॒ मन॑श्च मे॒

ādhī̍taṁ ca me̱ vākca̍ me̱ mana̍śca me̱

*learning, speech, mind,*

9 चक्षु॑श्च मे॒ श्रोत्रं॑ च मे॒ दक्ष॑श्च मे॒

cakṣu̍śca me̱ śrotra̍ṁ ca me̱ dakṣa̍śca me̱

*eyes, ears, discernment,*[1]

10 बलं॑ च म॒ ओज॑श्च मे॒ सह॑श्च म॒

bala̍ṁ ca ma̱ oja̍śca me̱ saha̍śca ma̱

*strength, might, force,*

11 आयु॑श्च मे ज॒रा च॑ म आ॒त्मा च॑ मे

āyu̍śca me ja̱rā ca̍ ma ā̱tmā ca̍ me

*life, (control of) decay, soul,*

12 त॒नूश्च॑ मे॒ शर्म᳚ च मे॒ वर्म᳚ च॒ मेऽङ्गा॑नि च मे॒

ta̱nūśca̍ me̱ śarma̍ ca me̱ varma̍ ca̱ me'ṅgā̍ni ca me̱

*body, happiness, armour, organs or limbs,*[2]

13 अस्थानि॑ च मे॒ परूग्ं॑षि च मे॒

asthāni̍ ca me̱ parūgṁ̍ṣi ca me̱

*bones, joints,*

14 शरी॑राणि च मे ॥ १ ॥

śarī̍rāṇi ca me ||1||

*subtle bodies.*[3]

[1] *The power of eyes and ears become perfect only by the use of discrimination; otherwise we get only the surface information.*

[2] *varma: the subtle covering which protects our bodies from external (hostile forces), gross or subtle*

[3] *may my joints etc., become perfect*

## Single words (of items praid for)

वाज॑ः । प्र॒स॒वः । प्रय॑तिः । प्रसि॑तिः । धी॒तिः । क्रतु॑ः । स्वर॑ः । श्लोक॑ः । श्रा॒वः । श्रुति॑ः ।
ज्योति॑ः । सुव॑ः । प्रा॒णः । अ॒पा॒नः । व्या॒नः । असु॑ः । चि॒त्तम् । आधी॑तम् । वाक् । मन॑ः ।
चक्षु॑ः । श्रोत्र᳚म् । दक्ष॑ः । बल᳚म् । ओज॑ः । सह॑ः । आयु॑ः । ज॒रा । आ॒त्मा । त॒नूः । शर्म॑ ।
वर्म॑ । अङ्गा॑नि । अ॒स्थानि॑ । परू॑ꣳषि । शरी॑राणि ॥

vāja̍ḥ | pra̱sa̱vaḥ | praya̍tiḥ | prasi̍tiḥ | dhī̱tiḥ | kratu̍ḥ | svara̍ḥ | śloka̍ḥ | śrā̱vaḥ | śruti̍ḥ | jyoti̍ḥ | suva̍ḥ | prā̱ṇaḥ | a̱pā̱naḥ | vyā̱naḥ | asu̍ḥ | ci̱ttam | ādhī̍tam | vāk | mana̍ḥ | cakṣu̍ḥ | śrotram̎ | dakṣa̍ḥ | balam̎ | oja̍ḥ | saha̍ḥ | āyu̍ḥ | ja̱rā | ā̱tmā | ta̱nūḥ | śarma̍ | varma̍ | aṅgā̍ni | a̱sthāni̍ | parūgṁ̍ṣi | śarī̍rāṇi ||

# Anuvāka 2

*This anuvāka lists the goals that are to be attained with the powers requested in the earlier anuvāka. The goals deal with those achievable primarily by the prāṇa energy. The goals include pre-eminence, enjoyment of the play in life, all-sided progress, wealth, choice of auspicious paths in life, etc. Even though the list mentions thought and right thinking, these are aspects under the sway of prāṇa and not the things under the control of mind.*

1 ज्यैष्ठ्यं॑ च म॒ आधि॑पत्यं च मे म॒न्युश्च॑ मे॒

jyaiṣṭhya̍ṁ ca ma̱ ādhi̍patyaṁ ca me ma̱nyuśca̍ me̱

*Pre-eminence, overlordship, and righteous wrath,*

2 भाम॑श्च॒ मेऽम॑श्च॒ मेऽम्भ॑श्च मे

bhāma̍śca̱ me'ma̍śca̱ me'mbha̍śca me

*blazing or anger, strength, impetuosity or spontaneity,* [4]

3 जे॒मा च॑ मे महि॒मा च॑ मे वरि॒मा च॑ मे

je̱mā ca̍ me mahi̱mā ca̍ me vari̱mā ca̍ me

*victorious power, greatness, breadth,*

4 प्रथि॒मा च॑ मे व॒र्ष्मा च॑ मे

prathi̱mā ca̍ me va̱rṣmā ca̍ me

*extent or wideness, might,*

5 द्राघु॒या च॑ मे वृ॒द्धं च॑ मे॒ वृद्धि॑श्च मे

drāghu̱yā ca̍ me vṛ̱ddhaṁ ca̍ me̱ vṛddhi̍śca me

*length, growth, growing,*

6 स॒त्यं च॑ मे श्र॒द्धा च॑ मे॒ जग॑च्च मे॒

sa̱tyaṁ ca̍ me śra̱ddhā ca̍ me̱ jaga̍cca me̱

*truth, faith, world or movement,*

7 धनं॑ च मे॒ वश॑श्च मे॒ त्विषि॑श्च मे क्री॒डा च॑ मे॒

dhana̍ṁ ca me̱ vaśa̍śca me̱ tviṣi̍śca me krī̱ḍā ca̍ me̱

*wealth, power, flaming energy, play,*

8 मोद॑श्च मे जा॒तं च॑ मे जनि॒ष्यमा॑णं च मे

moda̍śca me jā̱taṁ ca̍ me jani̱ṣyamā̍ṇaṁ ca me

*delight, what is born, what is to be born,*

9 सू॒क्तं च॑ मे सुकृ॒तं च॑ मे

sū̱ktaṁ ca̍ me sukṛ̱taṁ ca̍ me

*good words, good deeds,*

[4] *All the four qualities manyu,…, ambhaḥ together indicate the spontaneous and energetic response to the forces of evil without calculation of immediate gain or loss.*

10 वित्तं च मे वेद्यं च मे

vittaṁ ca me vedyaṁ ca me

*that which spreads (vittam), that which is to be known,*[5]

11 भूतं च मे भविष्यच्च मे सुगं च मे

bhūtaṁ ca me bhaviṣyacca me sugaṁ ca me

*past, future, auspicious goals,*

12 सुपथं च म ऋद्धं च म ऋद्धिश्च मे

supathaṁ ca ma ṛddhaṁ ca ma ṛddhiśca me

*auspicious paths in life, affluence, all-sided progress,*

13 क्लृप्तं च मे क्लृप्तिश्च मे

kḷptaṁ ca me kḷptiśca me

*agreement, agreeing,*

14 मतिश्च मे सुमतिश्च मे ॥२॥

matiśca me sumatiśca me ||2||

*thought, right thinking.*

[5] *vittam: is usually given the narrow meaning of physical riches*

## Single words (of items praid for)

ज्यैष्ठ्यम् । आधिपत्यम् । मन्युः । भामः । अमः । अम्भः । जेमा । महिमा । वरिमा । प्रथिमा । वर्ष्मा । द्राघुया । वृद्धम् । वृद्धिः । सत्यम् । श्रद्धा । जगत् । धनम् । वशः । त्विषिः । क्रीडा । मोदः । जातम् । जनिष्यमाणम् । सूक्तम् । सुकृतम् । वित्तम् । वेद्यम् । भूतम् । भविष्यत् । सुगम् । सुपथम् । ऋद्धम् । ऋद्धिः । क्लृप्तम् । क्लृप्तिः । मतिः । सुमतिः ॥

jyaiṣṭhyam | ādhipatyam | manyuḥ | bhāmaḥ | amaḥ | ambhaḥ | jemā | mahimā | varimā | prathimā | varṣmā | drāghuyā | vṛddham | vṛddhiḥ | satyam | śraddhā | jagat | dhanam | vaśaḥ | tviṣiḥ | krīḍā | modaḥ | jātam | janiṣyamāṇam | sūktam | sukṛtam | vittam | vedyam | bhūtam | bhaviṣyat | sugam | supatham | ṛddham | ṛddhiḥ | kḷptam | kḷptiḥ | matiḥ | sumatiḥ ||

# Anuvāka 3

*Here are listed the goals to be attained primarily by the use of mental powers. The prayer is, 'may these goals in their perfection be attained through the yajña'. The list includes teaching, discovery, eagerness for knowledge and Truth, immortality, understanding the rhythms in life, quest for immortality, freedom from diseases understanding the available paths in life and the choice of the right path. It includes the ability to sleep well, a power associated both with mind and prāṇa.*

1 शं च॑ मे॒ मय॑श्च मे प्रि॒यं च॑ मेऽनुका॒मश्च॑ मे॒

śaṁ ca̍ me̱ maya̍śca me pri̱yaṁ ca̍ me'nukā̱maśca̍ me̱

*Happiness, bliss, delight, wish for necessities, (may these qualities develop) in me;*

2 काम॑श्च मे सौमन॒सश्च॑ मे भ॒द्रं च॑ मे॒ श्रेय॑श्च मे॒

kāma̍śca me saumana̱saśca̍ me bha̱draṁ ca̍ me̱ śreya̍śca me̱

*desire, kindliness, auspiciousness, most excellent felicities,*

3 वस्य॑श्च मे॒ यश॑श्च मे॒ भग॑श्च मे॒ द्रवि॑णं च मे

vasya̍śca me̱ yaśa̍śca me̱ bhaga̍śca me̱ dravi̍ṇaṁ ca me

*habitation, glory, enjoyment, riches,*

4 य॒न्ता च॑ मे ध॒र्ता च॑ मे॒ क्षेम॑श्च मे॒

ya̱ntā ca̍ me dha̱rtā ca̍ me̱ kṣema̍śca me̱

*direction or teaching, serving or supporting (parents and others), protection,*

5 धृति॑श्च मे॒ विश्वं॑ च मे॒

dhṛti̍śca me̱ viśva̍ṁ ca me̱

*fortitude, all (noble) qualities,*

6 मह॑श्च मे सं॒विच्च॑ मे॒ ज्ञात्रं॑ च मे॒

maha̍śca me sa̱ṁvicca̍ me̱ jñātra̍ṁ ca me̱

*greatness, discovery, knowledge,*

7 सूश्च॑ मे प्र॒सूश्च॑ मे॒ सीरं॑ च मे ल॒यश्च॑ म

sūśca̍ me pra̱sūśca̍ me̱ sīra̍ṁ ca me la̱yaśca̍ ma

*creations, mothering, effort, rhythm,*[6]

8 ऋ॒तं च॑ मे॒ऽमृतं॑ च मेऽय॒क्ष्मं च॒ मेऽना॑मयच्च मे

ṛ̱taṁ ca̍ me̱'mṛta̍ṁ ca me'ya̱kṣmaṁ ca̱ me'nā̍mayacca me

*right action (Truth in movement), immortality, freedom from severe illness, freedom from diseases,*

[6] *Alternate meanings: sīra: plough, laya: harrow, sū: creation, release of the powers inside*

9 जी॒वातु॑श्च मे दी॒र्घायु॒त्वं च॑ मेऽन॒मि॒त्रं च॒ मेऽभ॑यं च मे

jīvātuśca me dīrghāyutvaṁ ca me'namitraṁ ca me'bhayaṁ ca me

*access for healing, long life, freedom from foe, freedom from fear,*

10 सु॒गं च॑ मे॒ शय॑नं च मे

sugaṁ ca me śayanaṁ ca me

*good journey (of life) (sugam), good sleep (śayanam).*

11 सू॒षा च॑ मे सु॒दिनं॑ च मे ॥३॥

sūṣā ca me sudinaṁ ca me ||3||

*May the dawns and the days be auspicious for me.*

## Single words (of items praid for)

शम् । मय॑ः । प्रि॒यम् । अ॒नु॒का॒मः । काम॑ः । सौ॒म॒न॒सः । भ॒द्रम् । श्रेय॑ः । वस्य॑ः । यश॑ः । भग॑ः । द्र॒वि॑णम् । य॒न्ता । ध॒र्ता । क्षेम॑ः । धृति॑ः । विश्व᳚म् । मह॑ः । सं॒वित् । ज्ञात्र᳚म् । सूः । प्र॒सूः । सीर᳚म् । ल॒यः । ऋ॒तम् । अ॒मृत᳚म् । अ॒य॒क्ष्मम् । अना॑मयत् । जी॒वातु॑ः । दी॒र्घा॒यु॒त्वम् । अ॒न॒मि॒त्रम् । अभ॑यम् । सु॒गम् । शय॑नम् । सू॒षा । सु॒दिन᳚म् ॥

śam | mayaḥ | priyam | anukāmaḥ | kāmaḥ | saumanasaḥ | bhadram | śreyaḥ | vasyaḥ | yaśaḥ | bhagaḥ | draviṇam | yantā | dhartā | kṣemaḥ | dhṛtiḥ | viśvam | mahaḥ | saṁvit | jñātram | sūḥ | prasūḥ | sīram | layaḥ | ṛtam | amṛtam | ayakṣmam | anāmayat | jīvātuḥ | dīrghāyutvam | anamitram | abhayam | sugam | śayanam | sūṣā | sudinam ||

# Anuvāka 4

*This anuvāka describes the powers or qualities which nourish both our gross and subtle bodies. It clearly includes abounding force, pleasant and true words, mental clarities, recognition of the delight in all our works, all pervading nature, freedom from hunger etc. This section mentions the names of varieties of grains such as rice, barley, wheat, lentils, wild rice, kidney beans, sesame, etc. Because of the oneness of nature and the humankind, each type of grain, pea or seed, represents a force which is needed in our body. They are endowed with attractive tastes so that our mouths accept them easily. The prayer is that the powers associated with these grains, seeds or herbs, may perfectly manifest in us.*

1 ऊर्क्च॑ मे सू॒नृता॑ च मे॒ पय॑श्च मे॒ रस॑श्च मे

ūrkca̍ me sū̱nṛtā̍ ca me̱ paya̍śca me̱ rasa̍śca me

*Abounding force, true and pleasant words, milk of knowledge, sap or essence, (may the qualities or things become perfect) in me;*

2 घृ॒तं च॑ मे॒ मधु॑ च मे॒ सग्धि॑श्च मे॒ सपी॑तिश्च मे

ghṛ̱taṁ ca̍ me̱ madhu̍ ca me̱ sagdhi̍śca me̱ sapī̍tiśca me

*mental clarity (ghee), (recognition of) delight or honey, delectable (food), nourishment for all,*

3 कृ॒षिश्च॑ मे॒ वृष्टि॑श्च मे॒ जैत्रं॑ च म॒ औद्भि॑द्यं च मे

kṛ̱ṣiśca̍ me̱ vṛṣṭi̍śca me̱ jaitraṁ̍ ca ma̱ audbhi̍dyaṁ ca me

*effort (agriculture), energies (rain), conquest, victory,*

4 र॒यिश्च॑ मे॒ राय॑श्च मे पु॒ष्टं च॑ मे॒ पुष्टि॑श्च मे

ra̱yiśca̍ me̱ rāya̍śca me pu̱ṣṭaṁ ca̍ me̱ puṣṭi̍śca me

*felicities, riches, growth, nourishment,*

5 वि॒भु च॑ मे प्र॒भु च॑ मे ब॒हु च॑ मे॒ भूय॑श्च मे

vi̱bhu ca̍ me pra̱bhu ca̍ me ba̱hu ca̍ me̱ bhūya̍śca me

*all-pervading nature, lordship, many (friends), wideness,*

6 पू॒र्णं च॑ मे पू॒र्णत॑रं च॒ मेऽक्षि॑तिश्च मे॒

pū̱rṇaṁ ca̍ me pū̱rṇata̍raṁ ca̱ me'kṣi̍tiśca me̱

*wholeness, plenitude, imperishableness,*

7 कूय॑वाश्च॒ मेऽन्नं॑ च॒ मेऽक्षु॑च्च मे

kūya̍vāśca̱ me'nna̍ṁ ca̱ me'kṣu̍cca me

*(power in) small sized grains, food, freedom from hunger,*

8 व्री॒हय॑श्च मे॒ यवा᳚श्च मे॒ माषा᳚श्च मे॒

vrī̱haya̍śca me̱ yavā̎śca me̱ māṣā̎śca me̱

*(power in) rice, barley, beans,*

9 तिला᳚श्च मे मु॒द्गाश्च॑ मे ख॒ल्वा᳚श्च मे

tilā̎śca me mu̱dgāśca̍ me kha̱lvā̎śca me

*(power in) sesame, kidney beans, vetches,*

10 गो॒धूमा᳚श्च मे म॒सुरा᳚श्च मे

go̱dhūmā̎śca me ma̱surā̎śca me

*(power in) wheat, lentils,*

11 प्रि॒यंग॑वश्च॒ मेऽण॑वश्च मे

pri̱yaṁga̍vaśca̱ me'ṇa̍vaśca me

*(power in) millet, fine paddy,*

12 श्या॒माका᳚श्च मे नी॒वारा᳚श्च मे ॥४॥

śyā̱mākā̎śca me nī̱vārā̎śca me ||4||

*(power in) panic grass, wild rice. May all these manifest in me or for me through yajña.*

## Single words (of items praid for)

ऊर्क् । सू॒नृता᳚ । पय॑ः । रस॑ः । घृ॒तम् । मधु॑ । सग्धि॑ः । सपी॑तिः । कृ॒षिः । वृष्टि॑ः । जैत्र᳚म् ।
औद्भि॑द्यम् । र॒यिः । राय॑ः । पु॒ष्टम् । पुष्टि॑ः । वि॒भु । प्र॒भु । ब॒हु । भूय॑ः । पू॒र्णम् । पू॒र्णत॑रम् ।
अक्षि॑तिः । कूय॑वाः । अन्न᳚म् । अक्षु॑त् । व्री॒हय॑ः । यवा᳚ः । माषा᳚ः । तिला᳚ः । मु॒द्गाः ।
ख॒ल्वा᳚ः । गो॒धूमा᳚ः । म॒सुरा᳚ः । प्रि॒यंग॑वः । अण॑वः । श्या॒माका᳚ः । नी॒वारा᳚ः ॥

ūrk | sū̱nṛtā̎ | paya̍ḥ | rasa̍ḥ | ghṛ̱tam | madhu̍ | sagdhi̍ḥ | sapī̍tiḥ | kṛ̱ṣiḥ | vṛṣṭi̍ḥ | jaitra̎m | audbhi̍dyam | ra̱yiḥ | rāya̍ḥ | pu̱ṣṭam | puṣṭi̍ḥ | vi̱bhu | pra̱bhu | ba̱hu | bhūya̍ḥ | pū̱rṇam | pū̱rṇata̍ram | akṣi̍tiḥ | kūya̍vāḥ | anna̎m | akṣu̍t | vrī̱haya̍ḥ | yavā̎ḥ | māṣā̎ḥ | tilā̎ḥ | mu̱dgāḥ | kha̱lvā̎ḥ | go̱dhūmā̎ḥ | ma̱surā̎ḥ | pri̱yaṁga̍vaḥ | aṇa̍vaḥ | śyā̱mākā̎ḥ | nī̱vārā̎ḥ ||

# Anuvāka 5

*The prayer is: 'may I be in hirmony with all these aspects of nature and may their powers manifest in me.*

1 अश्मा॑ च मे॒ मृत्ति॑का च मे गि॒रय॑श्च मे॒

aśmā̍ ca me̱ mṛtti̍kā ca me gi̱raya̍śca me̱

*Stone, clay, hills, (may these be auspicious for me).*

2 पर्व॑ताश्च मे॒ सिक॑ताश्च मे॒ वन॒स्पत॑यश्च मे॒

parva̍tāśca me̱ sika̍tāśca me̱ vana̱spata̍yaśca me̱

*mountains, sand, trees,*

3 हिर॑ण्यं च॒ मेऽय॑श्च मे॒ सीसं॑ च मे॒

hira̍ṇyaṁ ca̱ me'ya̍śca me̱ sīsa̍ṁ ca me̱

*gold, bronze, lead,*[7]

4 त्रपु॑श्च मे श्या॒मं च॑ मे लो॒हं च॑ मे॒ऽग्निश्च॑ म॒ आप॑श्च मे

trapu̍śca me śyā̱maṁ ca̍ me lo̱haṁ ca̍ me̱'gniśca̍ ma̱ āpa̍śca me

*tin, iron, copper, fire, water,*

5 वी॒रुध॑श्च म॒ ओष॑धयश्च मे कृष्टप॒च्यं च॑ मे

vī̱rudha̍śca ma̱ oṣa̍dhayaśca me kṛṣṭapa̱cyaṁ ca̍ me

*roots and herbs, what grows on ploughed land,*

6 अकृष्टप॒च्यं च॑ मे ग्रा॒म्याश्च॑ मे प॒शव॑ आर॒ण्याश्च॑ य॒ज्ञेन॑ कल्पन्तां

akṛṣṭapa̱cyaṁ ca̍ me grā̱myāśca̍ me pa̱śava̍ āra̱ṇyāśca̍ ya̱jñena̍ kalpantāṁ

*what grows on unploughed land, tame and wild cattle, may they all become harmonious through the sacrifice;*

7 वि॒त्तं च॑ मे॒ वित्ति॑श्च मे भू॒तं च॑ मे॒ भूति॑श्च मे॒

vi̱ttaṁ ca̍ me̱ vitti̍śca me bhū̱taṁ ca̍ me̱ bhūti̍śca me̱

*(may I have) wealth, gain of wealth, attainment, attaining,*

8 वसु॑ च मे वस॒तिश्च॑ मे॒ कर्म॑ च मे॒ शक्ति॑श्च मे

vasu̍ ca me vasa̱tiśca̍ me̱ karma̍ ca me̱ śakti̍śca̱ me

*riches, dwelling, action, power or energies,*

---

[7] *aya: that which is strong, usually refers to iron; it could refer to bronze also, since shyāma, a black metal has to be iron.*

9 अर्थ᳚श्च म॒ एम॑श्च म॒ इति॑श्च मे॒ गति॑श्च मे ॥५॥

artha̍śca ma̱ ema̍śca ma̱ iti̍śca me̱ gati̍śca me ||5||

*aim, strength, loving, reaching the goal (may all these qualities develop in me through the sacrifice).*

## Single words (of items praid for)

अश्मा᳚ । मृत्ति॑का । गि॒रय॑ः । पर्व॑ताः । सिक॑ताः । व॒नस्पत॑यः । हिर॑ण्यम् । अय॑ः । सीस᳚म् । त्रपु॑ । श्या॒मम् । लो॒हम् । अ॒ग्निः । आप॑ः । वी॒रुध॑ः । ओष॑धयः । कृ॒ष्ट॒प॒च्यम् । अ॒कृ॒ष्ट॒प॒च्यम् । ग्रा॒म्याः । आ॒र॒ण्याः । वि॒त्तम् । वित्ति॑ः । भू॒तम् । भूति॑ः । वसु॑ । व॒स॒तिः । कर्म᳚ । शक्ति॑ः । अर्थ᳚ः । एम॑ः । इति॑ः । गति॑ः ॥

aśmā̎ | mṛtti̍kā | gi̱raya̍ḥ | parva̍tāḥ | sika̍tāḥ | vana̱spata̍yaḥ | hira̍ṇyam | aya̍ḥ | sīsa̎m | trapu̍ | śyā̱mam | lo̱ham | a̱gniḥ | āpa̍ḥ | vī̱rudha̍ḥ | oṣa̍dhayaḥ | kṛ̱ṣṭa̱pa̱cyam | a̱kṛ̱ṣṭa̱pa̱cyam | grā̱myāḥ | ā̱ra̱ṇyāḥ | vi̱ttam | vitti̍ḥ | bhū̱tam | bhūti̍ḥ | vasu̍ | va̱sa̱tiḥ | karma̍ | śakti̍ḥ | artha̍ḥ | ema̍ḥ | iti̍ḥ | gati̍ḥ ||

# Anuvāka 6

*Each God like Agni or Indra is a cosmic power whiqh can endow our bodies with specific psychological powers. For instance, Agni is the power of will, Indra is the lord of the divine mind including its many aspects; Savitṛ or Sun is the supreme creator; Bṛhaspati represents vastness, etc. The prayer is that may all these Gods come in and grow in us perfectly manifesting their powers just as a child grows in a mother's womb.*

1 अ॒ग्निश्च॑ म॒ इन्द्र॑श्च मे॒ सोम॑श्च म॒

a̱gniśca̍ ma̱ indra̍śca me̱ soma̍śca ma̱

*Agni, lndra, Soma,*

2 इन्द्र॑श्च मे सवि॒ता च॑ म॒ इन्द्र॑श्च मे॒

indra̍śca me savi̱tā ca̍ ma̱ indra̍śca me̱

*Indra, Savitṛ, Indra,*

3 सर॑स्वती च म॒ इन्द्र॑श्च मे पू॒षा च॑ म॒

sara̍svatī ca ma̱ indra̍śca me pū̱ṣā ca̍ ma̱

*Sarasvati, Indra, Pūshan,*

4 इन्द्र॑श्च मे॒ बृह॒स्पति॑श्च म॒ इन्द्र॑श्च मे

indra̍śca me̱ bṛha̱spati̍śca ma̱ indra̍śca me

*lndra, Bṛhaspati, lndra,*

5 मि॒त्रश्च॑ म॒ इन्द्र॑श्च मे॒ वरु॑णश्च म॒

mi̱traśca̍ ma̱ indra̍śca me̱ varu̍ṇaśca ma̱

*Mitra, Indra, Varuṇa,*

6 इन्द्र॑श्च मे॒ त्वष्टा॑ च म॒

indra̍śca me̱ tvaṣṭā̍ ca ma̱

*Indra, Tvaṣṭa,*

7 इन्द्र॑श्च मे धा॒ता च॑ म॒ इन्द्र॑श्च मे॒

indra̍śca me dhā̱tā ca̍ ma̱ indra̍śca me̱

*Indra, Dhātṛ, Indra,*

8 विष्णु॑श्च म॒ इन्द्र॑श्च मे॒ऽश्विनौ॑ च म॒

viṣṇu̍śca ma̱ indra̍śca me̱'śvinau̍ ca ma̱

*Viṣṇu, Indra, Aśvins,*

9 इन्द्र॑श्च मे म॒रुत॑श्च म॒ इन्द्र॑श्च मे॒

indra̍śca me ma̱ruta̍śca ma̱ indra̍śca me̱

*Indra, Maruts, Indra,*

10 विश्वे॑ च मे दे॒वा इन्द्र॑श्च मे पृ॒थि॒वी च॑ म॒

viśve ca me de̲vā indraśca me pṛthi̲vī ca ma̲

*All-Gods, Indra, Earth,*

11 इन्द्र॑श्च मे॒ऽन्तरि॑क्षं च म॒ इन्द्र॑श्च मे॒

indraśca me̲'ntarikṣaṁ ca ma̲ indraśca me̲

*Indra, midworld, Indra,*

12 द्यौश्च॑ म॒ इन्द्र॑श्च मे॒ दिश॑श्च म॒ इन्द्र॑श्च मे

dyauśca ma̲ indraśca me̲ diśaśca ma̲ indraśca me

*Heaven, Indra, quarters or space; Indra,*

13 मू॒र्द्धा च॑ म॒ इन्द्र॑श्च मे प्र॒जाप॑तिश्च म॒ इन्द्र॑श्च मे ॥ ६ ॥

mū̲rddhā ca ma̲ indraśca me pra̲jāpatiśca ma̲ indraśca me ||6||

*the worlds above (head), Indra, Prajāpati, Indra. May all these Gods and Goddesses manifest in me through yajña.*

## Single words (of items praid for)

अ॒ग्निः । इन्द्रः॑ । सोमः॑ । इन्द्रः॑ । स॒वि॒ता । इन्द्रः॑ । सर॑स्वती । इन्द्रः॑ । पू॒षा । इन्द्रः॑ । बृ॒ह॒स्पतिः॑ । इन्द्रः॑ । मि॒त्रः । इन्द्रः॑ । वरु॑णः । इन्द्रः॑ । त्वष्टा᳚ । इन्द्रः॑ । धा॒ता । इन्द्रः॑ । विष्णुः॑ । इन्द्रः॑ । अ॒श्विनौ᳚ । इन्द्रः॑ । म॒रुतः॑ । इन्द्रः॑ । विश्वे᳚ । दे॒वाः । इन्द्रः॑ । पृ॒थि॒वी । इन्द्रः॑ । अ॒न्तरि॑क्षम् । इन्द्रः॑ । द्यौः । इन्द्रः॑ । दिशः॑ । इन्द्रः॑ । मू॒र्द्धा । इन्द्रः॑ । प्र॒जाप॑तिः । इन्द्रः॑ ॥

a̲gniḥ | indraḥ | somaḥ | indraḥ | sa̲vi̲tā | indraḥ | sarasvatī | indraḥ | pū̲ṣā | indraḥ | bṛha̲spatiḥ | indraḥ | mi̲traḥ | indraḥ | varuṇaḥ | indraḥ | tvaṣṭā | indraḥ | dhā̲tā | indraḥ | viṣṇuḥ | indraḥ | a̲śvinau | indraḥ | ma̲rutaḥ | indraḥ | viśve | de̲vāḥ | indraḥ | pṛ̲thi̲vī | indraḥ | a̲ntarikṣam | indraḥ | dyauḥ | indraḥ | diśaḥ | indraḥ | mū̲rddhā | indraḥ | pra̲jāpatiḥ | indraḥ ||

# Anuvāka 7

*In the inner yajña, each, word like amśu, raśmi represents an aspect of self-offering to the respective deity i.e., each epithet represents an aspect of the cosmic power which accepts the Soma of Delight; the Soma is being shared by all the deities; this sharing symbolically represents the harmony among the different powers and the harmony of their manifestation in our bodies. The epithets include the name of God like Maruts or the phrase marutvata, power belonging to the Gods Maruts. The epithets include the powers themselves without symbolism such as effulgence, the light within (upāmṣu), inner controller (antaryāma). In the ritual, words occurring here such as amśu, raśmi, etc., stand for the names of cups in which the Soma juice is offered to the respective deities.*

1 अगंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मे

agṁśuśca me raśmiśca me'dābhyaśca me

*(Power of) effulgence, rays, the unassailable one,*

2 अधिपतिश्च म उपागंशुश्च मे

adhipatiśca ma upāgṁśuśca me

*(power of) overlord, the light within,*

3 अन्तर्यामश्च म ऐन्द्रवायवश्च मे

antaryāmaśca ma aindravāyavaśca me

*(power of) the inner controller, Indra and Vayu,*

4 मैत्रावरुणश्च म आश्विनश्च मे

maitrāvaruṇaśca ma āśvinaśca me

*(power of) Mitra and Varuṅa, Ashvins,*

5 प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म

pratiprasthānaśca me śukraśca me manthī ca ma

*foundation, Śukra, churning (manthī),*

6 आग्रयणश्च मे वैश्वदेवश्च मे

āgrayaṇaśca me vaiśvadevaśca me

*leader, All-Gods,*

7 ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मे

dhruvaśca me vaiśvānaraśca ma ṛtugrahāśca me

*firmness, Universal Godhead, Divine Timing,*

8 अतिग्राह्याश्च म ऐन्द्राग्नश्च मे

atigrāhyāśca ma aindrāgnaśca me

*firm hold (of Gods), Indra and Agni,*

9 वैश्वदेवश्च मे मरुत्वतीयाश्च मे

vaiśvadevaśca me marutvatīyāśca me

*(offering for) All-Gods, for Maruts,*

10 माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे

māhendraśca ma ādityaśca me sāvitraśca me

*Māhendra, Āditya, Savitṛ*

11 सारस्वतश्च मे पौष्णश्च मे

sārasvataśca me pauṣṇaśca me

*Sarasvān or Sarasvati, Pūṣaṇ,*

12 पात्नीवतश्च मे हारियोजनश्च मे ॥७॥

pātnīvataśca me hāriyojanaśca me ||7||

*the śaktis (wives) of Gods, the yoked steeds.*

## Single words (of items praid for)

अगंशुः । रश्मिः । अदाभ्यः । अधिपतिः । उपागंशुः । अन्तर्यामः । ऐन्द्रवायवः । मैत्रावरुणः । आश्विनः । प्रतिप्रस्थानः । शुक्रः । मन्थी । आग्रयणः । वैश्वदेवः । ध्रुवः । वैश्वानरः । ऋतुग्रहाः । अतिग्राह्याः । ऐन्द्राग्नः । वैश्वदेवः । मरुत्वतीयाः । माहेन्द्रः । आदित्यः । सावित्रः । सारस्वतः । पौष्णः । पात्नीवतः । हारियोजनः ॥

agṁśuḥ | raśmiḥ | adābhyaḥ | adhipatiḥ | upāgṁśuḥ | antaryāmaḥ | aindravāyavaḥ | maitrāvaruṇaḥ | āśvinaḥ | pratiprasthānaḥ | śukraḥ | manthī | āgrayaṇaḥ | vaiśvadevaḥ | dhruvaḥ | vaiśvānaraḥ | ṛtugrahāḥ | atigrāhyāḥ | aindrāgnaḥ | vaiśvadevaḥ | marutvatīyāḥ | māhendraḥ | ādityaḥ | sāvitraḥ | sārasvataḥ | pauṣṇaḥ | pātnīvataḥ | hāriyojanaḥ ||

# Anuvāka 8

*By yajña is meant both the one happening in our subtle body and the external or outer yajña involving the physical fire, ghee etc. Each accompaniment in the external yajña has a correspondence in the internal yajña with its associated power; the prayer here is for the manifestation of those powers in us. For instance the first one in the list here is idhma, the fuel. In the external yajña, it is the kindling sticks. The prayer, 'may yajña make these sticks perfect or available in plenty' is trite. But the fuel here is our inner force which drives all our external works. Clearly only the inner yajña can make this force perfect or harmonious.*

1 इध्मश्च मे बर्हिश्च मे वेदिश्च मे

idhmaśca me barhiśca me vediśca me

*Fuel, grass strew, the altar,*

2 धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे

dhiṣṇiyāśca me srucaśca me camasāśca me

*minor altars or acts of comprehension, ladles (uplifted aspiration), camasā bowl (to collect Soma),*

3 ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मे

grāvāṇaśca me svaravaśca ma uparavāśca me

*pressing stones (vajra), the sounds (rava) from the world of light, the sounds (heard) nearby,*

4 अधिषवणे च मे द्रोणकलशश्च मे

adhiṣavaṇe ca me droṇakalaśaśca me

*the two platters (heaven and earth), the pot for storing Soma (body),*

5 वायव्यानि च मे पूतभृच्च म

vāyavyāni ca me pūtabhṛcca ma

*Vāyu, bearing the purified Soma,*

6 आधवनीयश्च म आग्नीध्रं च मे

ādhavanīyaśca ma āgnīdhraṁ ca me

*mixing bowl, Āgnīdhra altar,*

7 हविर्धानं च मे गृहाश्च मे

havirdhānaṁ ca me gṛhāśca me

*oblation holder, house,*

8 सदश्च मे पुरोडाशाश्च मे पचताश्च मे

sadaśca me puroḍāśāśca me pacatāśca me

*seats for Gods, puroḍāśā cakes, cooked offerings,*

9 अवभृथश्च मे स्वगाकारश्च मे ॥८॥

avabhṛthaśca me svagākāraśca me ||8||

*(act which grants protection) final bath, svāhā chant.*

## Single words (of items praid for)

इध्मः । बर्हिः । वेदिः । धिष्णियाः । स्रुचः । चमसाः । ग्रावाणः । स्वरवः । उपरवाः । अधिषवणे । द्रोणकलशः । वायव्यानि । पूतभृत् । आधवनीयः । आग्नीध्रम् । हविर्धानम् । गृहाः । सदः । पुरोडाशाः । पचताः । अवभृथः । स्वगाकारः ॥

idhmaḥ | barhiḥ | vediḥ | dhiṣṇiyāḥ | srucaḥ | camasāḥ | grāvāṇaḥ | svaravaḥ | uparavāḥ | adhiṣavaṇe | droṇakalaśaḥ | vāyavyāni | pūtabhṛt | ādhavanīyaḥ | āgnīdhram | havirdhānam | gṛhāḥ | sadaḥ | puroḍāśāḥ | pacatāḥ | avabhṛthaḥ | svagākāraḥ ||

# Anuvāka 9

*This anuvāka mentions the powers of Light and sound which are closely connected. It begins with Agni who is intimately associated with the potent word (Vāk), then comes his blaze which spreads the Agni power; next comes the ṛk mantra, the mantra of illumination; then comes Sūrya, the highest light which he gives to all seekers etc. It includes Prāṇa, Aśvamedha etc., because these powers are intimately associated with the mantra. Of course, the list includes the yajus mantra, the stoma chants (a particular way of chanting Sāma mantrās), some specific types of Sāma chants like the Bṛhat and Rathantara. It mentions also the power of askesis (tapas) and the initiation or consecration (dīkṣā) which is the starting point for the understanding of the power of mantra.*

1 अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे

agniśca me gharmaśca me'rkaśca me sūryaśca me

*Agni, the blaze, hymns of illumination (arka), Sūrya,*

2 प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मे

prāṇaśca me'śvamedhaśca me pṛthivī ca me

*life-force or prāṇa, intelligence of Life-force (Aśvamedha), earth,*

3 अदितिश्च मे दितिश्च मे द्यौश्च मे

aditiśca me ditiśca me dyauśca me

*Aditi, Diti, Heaven (dyau),*

4 शक्करीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्ताम

śakvarīraṅgulayo diśaśca me yajñena kalpantām

*the space (diśa) of skilful (aṅguli) and harmonious metres (śakvarī), may all these powers develop in me.*

5 ऋक्च मे साम च मे

ṛkca me sāma ca me

*Ṛk (the verse of light) (mantrās), sāman (mantrās),*

6 स्तोमश्च मे यजुश्च मे दीक्षा च मे

stomaśca me yajuśca me dīkṣā ca me

*stoma hymns, yajus mantrās, initiation (word),*

7 तपश्च म ऋतुश्च मे व्रतं च मे

tapaśca ma ṛtuśca me vrataṁ ca me

*askesis, the Divine Timing, law of workings (vrata),*

8 अहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे

ahorātrayorvṛṣṭyā bṛhadrathantare ca me

*shower of energies of day and night (caused by) the Bṛhat and Rathantara (Sāman),*

9 यज्ञेन॑ कल्पेताम् ॥९॥

yajñena kalpetām ||9||

*may all these powers manifest in me through yajña.*

## Single words (of items praid for)

अ॒ग्निः । घ॒र्मः । अ॒र्कः । सूर्यः॑ । प्रा॒णः । अ॒श्व॒मे॒धः । पृ॒थि॒वी । अदि॑तिः । दिति॑ः । द्यौः । शक्व॑रीः । अ॒ङ्गुल॑यः । दिश॑ः । ऋक् । साम॑ । स्तोम॑ः । यजु॑ः । दी॒क्षा । तप॑ः । ऋ॒तुः । व्र॒तम् । अ॒हो॒रा॒त्रयोः॑ । वृ॒ष्ट्या । बृ॒ह॒द्र॒थ॒न्त॒रे ॥

agniḥ | gharmaḥ | arkaḥ | sūryaḥ | prāṇaḥ | aśvamedhaḥ | pṛthivī | aditiḥ | ditiḥ | dyauḥ | śakvarīḥ | aṅgulayaḥ | diśaḥ | ṛk | sāma | stomaḥ | yajuḥ | dīkṣā | tapaḥ | ṛtuḥ | vratam | ahorātrayoḥ | vṛṣṭyā | bṛhadrathantare ||

# Anuvāka 10

*This anuvāka has been divided (by Dr. R.L. Kashyap) into two parts, part (i) and part (ii). For the ritualist, the part (i) consists of a list of animals mainly calves, male and female, of various ages such as one and a half year, two year, two and a half year etc. The list ends with the barren cow, the cow that miscarries etc., whose presence seems strange in this anuvāka entitled 'vasordhāra', 'shower of felicities'. Viewed symbolically, each entry represents a type of human being at a certain stage of development indicated by age. Similarly barrenness or miscarriage represents lack of harmony. The prayer is, 'may all these human beings be filled with appropriate powers needed for their development and removal of inharmonies like barrenness'.*

*The second part (which starts from line 9 below) is more interesting. It specifically mentions the prayer for perfection of our principal prāṇa energies, our senses, mind and the soul also. The ṛṣi here recognizes that even though the soul is perfect, it is covered by impurities of our thoughts etc. Here clearly there is an allusion to the theory of adhyāsa (superposition) developed by Āchārya Śankara in great detail. Finally it declares, 'may yajña become perfect by yajña'.*

1 गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे

garbhāśca me vatsāśca me tryaviśca me tryavī ca me

*(Power of) embryo, the calves, one and a half year old male, one and a half year old female,*

2 दित्यवाट् च मे दित्यौही च मे

dityavāṭ ca me dityauhī ca me

*(power of) two years old male and female,*

3 पञ्चाविश्च मे पञ्चावी च मे

pañcāviśca me pañcāvī ca me

*(power of) two and a half years old male and female,*

4 त्रिवत्सश्च मे त्रिवत्सा च मे

trivatsaśca me trivatsā ca me

*(power of) three years old male and female,*

5 तुर्यवाट् च मे तुर्यौही च मे

turyavāṭ ca me turyauhī ca me

*three and half a years old male and female,*

6 पष्ठवाट् च मे पष्ठौही च म

paṣṭhavāṭ ca me paṣṭhauhī ca ma

*four years old male and female,*

7 उक्षा च मे वशा च म ऋषभश्च मे

ukṣā ca me vaśā ca ma ṛṣabhaśca me

*bull (of diffusing energy ), barren-cow, powerful ox (ṛṣabha),*

8 वे॒हच्च॑ मेऽन॒ड्वाञ्च॑ मे धे॒नुश्च॑ म॒

ve̱hacca̍ me'na̱ḍvāñca̍ me dhe̱nuśca̍ ma̱

*(power of) Cow that miscarries, bullock and the milch-cow;*

9 आयु॑र्य॒ज्ञेन॑ कल्पतां प्रा॒णो य॒ज्ञेन॑ कल्पताम्

āyu̍rya̱jñena̍ kalpatāṁ prā̱ṇo ya̱jñena̍ kalpatām

*may life become perfect by yajña, may prāṇa become perfect by yajña,*

10 अपा॒नो य॒ज्ञेन॑ कल्पतां व्या॒नो य॒ज्ञेन॑ कल्पता॒ं

apā̱no ya̱jñena̍ kalpatāṁ vyā̱no ya̱jñena̍ kalpatā̱ṁ

*may apāna become perfect by yajña, may vyāna become perfect by yajña,*

11 चक्षु॑र्य॒ज्ञेन॑ कल्पता॒ग् श्रोत्र॑ं य॒ज्ञेन॑ कल्पता॒ं

cakṣu̍rya̱jñena̍ kalpatā̱g śrotra̍ṁ ya̱jñena̍ kalpatā̱ṁ

*may eyes become perfect by yajña, may ears become perfect by yajña,*

12 मनो॑ य॒ज्ञेन॑ कल्पता॒ं वाग्य॒ज्ञेन॑ कल्पताम

mano̍ ya̱jñena̍ kalpatā̱ṁ vāgya̱jñena̍ kalpatām

*may mind become perfect by yajña, may speech become perfect by yajña,*

13 आ॒त्मा य॒ज्ञेन॑ कल्पतां य॒ज्ञो य॒ज्ञेन॑ कल्पताम् ॥ १० ॥

ā̱tmā ya̱jñena̍ kalpatāṁ ya̱jño ya̱jñena̍ kalpatām ||10||

*may the soul become perfect by yajña, may yajña become perfect by yajña.*

## Single words (of items praid for)

गर्भा᳚ः । व॒त्साः । त्र्यवि॑ः । त्र्य॒वी । दि॒त्य॒वाट् । दि॒त्यौ॒ही । पञ्चा॑विः । प॒ञ्चा॒वी । त्रि॒व॒त्सः ।

त्रि॒व॒त्सा । तु॒र्य॒वाट् । तु॒र्यौ॒ही । प॒ष्ठ॒वात् । प॒ष्ठौ॒ही । उ॒क्षा । व॒शा । ऋ॒ष॒भः । वे॒हत् । अ॒न॒ड्वान् ।

धे॒नुः । आयु॑ः । प्रा॒णः । अ॒पा॒नः । व्या॒नः । चक्षु॑ः । श्रोत्र᳚म् । मन॑ः । वाक् । आ॒त्मा । य॒ज्ञः ॥

garbhā̎ḥ | va̱tsāḥ | tryavi̍ḥ | trya̱vī | di̱tya̱vāṭ | di̱tyau̱hī |
pañca̍viḥ | pa̱ñcā̱vī | tri̱va̱tsaḥ | tri̱va̱tsā | tu̱rya̱vāṭ |
tu̱ryau̱hī | pa̱ṣṭha̱vāt | pa̱ṣṭhau̱hī | u̱kṣā | va̱śā | ṛ̱ṣa̱bhaḥ |
ve̱hat | a̱na̱ḍvān | dhe̱nuḥ | āyu̍ḥ | prā̱ṇaḥ | a̱pā̱naḥ |
vyā̱naḥ | cakṣu̍ḥ | śrotra̎m | mana̍ḥ | vāk | ā̱tmā | ya̱jñaḥ ||

# Anuvāka 11

*May the powers associated with these integers manifest in me; for example, one stands for the absolute, three stands for the powers of the three lower planes, three upper planes, etc.*

1 एका॑ च मे ति॒स्रश्च॑ मे॒ पञ्च॑ च मे

ekā̍ ca me ti̱sraśca̍ me̱ pañca̍ ca me

*One, three, five,*

2 स॒प्त च॑ मे॒ नव॑ च म॒ एका॑दश च मे॒

sa̱pta ca̍ me̱ nava̍ ca ma̱ ekā̍daśa ca me̱

*seven, nine, eleven,*

3 त्रयो॑दश च मे॒ पञ्च॑दश च मे स॒प्तद॑श च मे॒

trayo̍daśa ca me̱ pañca̍daśa ca me sa̱ptada̍śa ca me̱

*thirteen, fifteen, seventeen,*

4 नव॑दश च म॒ एक॑विꣳशतिश्च मे॒

nava̍daśa ca ma̱ eka̍vigṁśatiśca me̱

*nineteen, twenty one,*

5 त्रयो॑विꣳशतिश्च मे॒ पञ्च॑विꣳशतिश्च मे

trayo̍vigṁśatiśca me̱ pañca̍vigṁśatiśca me

*twenty three, twenty five,*

6 स॒प्तवि॑ꣳशतिश्च मे॒ नव॑विꣳशतिश्च म॒

sa̱ptavigṁ̍śatiśca me̱ nava̍vigṁśatiśca ma̱

*twenty seven, twenty nine,*

7 एक॑त्रिꣳशच्च मे॒ त्रय॑स्त्रिꣳशच्च मे॒

eka̍trigṁśacca me̱ traya̍strigṁśacca me̱

*thirty one, thirty three;*

8 चत॑स्रश्च मे॒ऽष्टौ च॑ मे॒ द्वाद॑श च मे॒

cata̍sraśca me̱'ṣṭau ca̍ me̱ dvāda̍śa ca me̱

*four, eight, twelve,*

9 षोड॑श च मे विꣳश॒तिश्च॑ मे॒

ṣoḍa̍śa ca me vigṁśa̱tiśca̍ me̱

*sixteen, twenty,*

10 चतु॑र्विꣳशतिश्च मे॒ऽष्टावि॑ꣳशतिश्च मे॒

catu̍rvigṁśatiśca me̱'ṣṭāvigṁ̍śatiśca me̱

*twenty four, twenty eight,*

[11] द्वात्रिग्ं॑शच्च मे॒ षट्त्रिग्ं॑शच्च मे

dvātrigṁ̍śacca me̱ ṣaṭtrigṁ̍śacca me

*thirty two, thirty six,*

[12] चत्वा॒रि॒ग्ं॒शच्च॑ मे॒ चतु॑श्चत्वारिग्ंशच्च मे॒

catvāri̱gṁ̱śacca̍ me̱ catu̍ścatvārigṁśacca me̱

*forty, forty four,*

[13] अष्टाच॑त्वारिग्ंशच्च मे॒

aṣṭāca̍tvārigṁśacca me̱

*forty eight,*

[14] वाज॑श्च प्रस॒वश्चा॑पि॒जश्च॒

vāja̍śca prasa̱vaścā̍pi̱jaśca̱

*opulence, the origination, repeated birth or production (apija),*

[15] क्रतु॑श्च॒ सुव॑श्च मू॒र्द्धा च॒ व्यश्नि॑यश्च

kratu̍śca̱ suva̍śca mū̱rddhā ca̱ vyaśñi̍yaśca

*will, light, head or mental power, that which is present in the all-pervading ākāśa,*

[16] आन्त्याय॒नश्चान्त्य॑श्च

āntyāya̱naścāntya̍śca

*the final-offering, the last,*

[17] भौव॒नश्च॒ भुव॑न॒श्चाधि॑पतिश्च ॥११॥

bhauva̱naśca̱ bhuva̍na̱ścādhi̍patiśca ||11||

*manifestation of being, the being, the overlord, (prosper through yajña). May all this become perfect in me through yajña.*

## Single words (of items praid for)

एका᳚ । ति॒स्रः । पञ्च॑ । स॒प्त । नव॑ । एका॑दश । त्रयो॑दश । पञ्च॑दश । स॒प्तद॑श । नव॑दश ।

एक॑विग्ंशतिः । त्रयो॑विग्ंशतिः । पञ्च॑विग्ंशतिः । स॒प्तवि॑ग्ंशतिः । नव॑विग्ंशतिः ।

एक॑त्रिग्ंशत् । त्रय॑स्त्रिग्ंशत् । चत॑स्रः । अ॒ष्टौ । द्वाद॑श । षोड॑श । वि॒ग्ं॒श॒तिः । चतु॑र्विग्ंशतिः ।

अ॒ष्टावि॑ग्ंशतिः । द्वात्रि॑ग्ंशत्। षट्त्रि॑ग्ंशत् । च॒त्वा॒रि॒ग्ं॒शत् । चतु॑श्चत्वारिग्ंशत् ।

अ॒ष्टाच॑त्वारिग्ंशत् । वाज॑ः । प्र॒स॒वः । अ॒पि॒जः । क्रतु॑ः । सुव॑ः । मू॒र्द्धा । व्यश्नि॑यः ।

आ॒न्त्या॒य॒नः । अन्त्य॑ः । भौ॒व॒नः । भुव॑नः । अधि॑पतिः ॥

ekā᳚ | ṯisraḥ | pañca̍ | sa̱pta | nava̍ | ekā̍daśa | trayo̍daśa | pañca̍daśa | sa̱ptada̍śa | nava̍daśa | ekavi̍gm̐śatiḥ | trayo̍vigm̐śatiḥ | pañca̍vigm̐śatiḥ | sa̱ptavigm̐̍śatiḥ | nava̍vigm̐śatiḥ | ekā̍trigm̐śat | traya̍strigm̐śat | cata̍sraḥ | a̱ṣṭau | dvāda̍śa | ṣoḍa̍śa | vi̱gm̱̐śa̱tiḥ | catu̍rvigm̐śatiḥ | a̱ṣṭāvigm̐̍śatiḥ | dvātrigm̐̍śat | ṣaṭtrigm̐̍śat | ca̱tvā̱ri̱gm̱̐śat | catu̍ścatvārigm̐śat | a̱ṣṭāca̍tvārigm̐śat | vāja̍ḥ | pra̱sa̱vaḥ | a̱pi̱jaḥ | kratu̍ḥ | suva̍ḥ | mū̱rddhā | vyaśñi̍yaḥ | ā̱ntyā̱ya̱naḥ | antya̍ḥ | bhau̱va̱naḥ | bhuva̍naḥ | adhi̍patiḥ ||

# Concluding mantrās

*These mantrās are recited after reciting the Camakam hymn.*

1 इडा॑ दे॒व॒हूर्मनु॑र्य॒ज्ञनी॒र्बृह॒स्पति॑रुक्थाम॒दानि॑ शग्ं॑सिष॒द्विश्वे॑दे॒वाः सू᳚क्त॒वा॒चः

iḍā̍ deva̱hūrmanu̍ryajña̱nīrbṛha̱spati̍rukthāma̱dāni̍
śagṁsiṣa̱dviśve̍de̱vāḥ sū̎kta̱vāca̱ḥ

*May Iḍā summon the Gods, may Manu lead the sacrifice, may Bṛhaspati chant the hymns and acclamations; the All-gods are reciters of the hymns.*[8]

2 पृथि॑विमा॒तर्मा॑ मा॑ हिग्ं॒सी॒ः

pṛthi̍vimāta̱rmā mā̍ higṁsī̱ḥ

*O Earth mother, protect me.*

3 मधु॑ मनिष्ये॒ मधु॑ जनिष्ये॒

madhu̍ maniṣye̱ madhu̍ janiṣye̱

*I shall think of delight (honey), honey I shall produce,*

4 मधु॑ वक्ष्यामि॒ मधु॑ वदिष्यामि॒

madhu̍ vakṣyāmi̱ madhu̍ vadiṣyāmi̱

*honey I shall proclaim, honey I shall speak,*[9]

5 मधु॑मतीं दे॒वेभ्यो॒ वाच॑मुद्यासग्ं शुश्रू॒षेण्या᳚ं मनु॒ष्ये᳚भ्य॒ः

madhu̍matīṁ de̱vebhyo̱ vāca̍mudyāsagṁ śuśrū̱ṣeṇyā̎ṁ
manu̱ṣye̎bhya̱ḥ

*may I utter speech full of delight for the gods, and (may I utter speech) which is a delight to the ears (śuśrūṣaṇa) of men and acceptable to men.*

6 तं मा॑ दे॒वा अ॑वन्तु शो॒भायै॑ पि॒तरोऽनु॑मदन्तु ॥

taṁ mā̍ de̱vā a̍vantu śo̱bhāyai̍ pi̱taro'nu̍madantu ||

*May the Gods enhance me with the forms of beauty, may the Pitṛs rejoice in me.*[10]

---

[8] *This verse indicates that all the different Gods perform the different aspects of yajña.*

[9] *madhu: honey, delight of existence*

[10] *This verse is one of the earliest prayers for the enhancement of beauty in all its forms.*

# Anuvāka 1- 11 with phonetic changes of anusvāra and visarga

अग्नाविष्णू सजोषसेमावर्धन्तु वाङ्ग् गिरः । द्युम्नैर्वाजेभिरागतम् ॥

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तञ् च म आधीतञ् च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रञ् च मे दक्षश्च मे बलञ् च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूग्ंषि च मे शरीराणि च मे ॥१॥

ज्यैष्ठ्यञ् च म आधिपत्यञ् च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धञ् च मे वृद्धिश्च मे सत्यञ् च मे श्रद्धा च मे जगच्च मे धनञ् च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातञ् च मे जनिष्यमाणञ् च मे सूक्तञ् च मे सुकृतञ् च मे वित्तञ् च मे वेद्यञ् च मे भूतञ् च मे भविष्यच्च मे सुगञ् च मे सुपथञ् च म ऋद्धञ् च म ऋद्धिश्च मे क्लृप्तञ् च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे ॥२॥

शञ् च मे मयश्च मे प्रियञ् च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रञ् च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणञ् च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वञ् च मे महश्च मे सम्विच्च मे ज्ञात्रञ् च मे सूश्च मे प्रसूश्च मे सीरञ् च मे लयश्च म ऋतञ् च मेऽमृतञ् च मेऽयक्ष्मञ् च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वञ् च मेऽनमित्रञ् च मेऽभयञ् च मे सुगञ् च मे शयनञ् च मे सूषा च मे सुदिनञ् च मे ॥३॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतञ् च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रञ् च म औद्भिद्यञ् च मे रयिश्च मे रायश्च मे पुष्टञ् च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णञ् च मे पूर्णतरञ् च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नञ् च मेऽक्षुच्च मे व्रीहयश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियङ्गवश्च मेऽणवश्च मे श्यामाकाश्च मे नीवाराश्च मे ॥४॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यञ् च मेऽयश्च मे सीसञ् च मे त्रपुश्च मे श्यामञ् च मे लोहञ् च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यञ् च मेऽकृष्टपच्यञ् च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्ताम् वित्तञ् च मे वित्तिश्च मे भूतञ् च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे ॥५॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्द्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥६॥

अगंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपागंशुश्च मेऽन्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे ॥७॥

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीध्रञ् च मे हविर्धानञ् च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥८॥

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्करीरङ्गुलयो दिशश्च मे यज्ञेन कल्पन्तामृक्च मे साम च मे स्तोमश्च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतञ् च मेऽहोरात्रयोर्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेताम् ॥९॥

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाट् च मे पष्ठौही च म उक्षा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पताम् प्राणो यज्ञेन कल्पतामपानो यज्ञेन कल्पताम् व्यानो यज्ञेन कल्पताञ् चक्षुर्यज्ञेन कल्पताग् श्रोत्रं यज्ञेन कल्पताम् मनो यज्ञेन कल्पताम् वाग्यज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम् ॥१०॥

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविंगंशतिश्च मे त्रयोविंगंशतिश्च मे पञ्चविंगंशतिश्च मे सप्तविंगंशतिश्च मे नवविंगंशतिश्च म एकत्रिंगंशच्च मे त्रयस्त्रिंगंशच्च मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विंगंशतिश्च मे चतुर्विंगंशतिश्च मेऽष्टाविंगंशतिश्च मे द्वात्रिंगंशच्च मे षट्त्रिंगंशच्च मे चत्वारिंगंशच्च मे चतुश्चत्वारिंगंशच्च मेऽष्टाचत्वारिंगंशच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्चान्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च ॥११॥

इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि शगंसिषद्विश्वेदेवास् सूक्तवाचः पृथिविमातर्मा मा हिगंसीर्मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीन् देवेभ्यो वाचमुद्यासगं शुश्रूषेण्याम् मनुष्येभ्यस्तम् मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥

agnāviṣṇū sajoṣasemāvardhantu vāṅ giraḥ |
dyumnairvājebhirāgatam ||

vājaśca me prasavaśca me prayatiśca me prasitiśca me dhītiśca me kratuśca me svaraśca me ślokaśca me śrāvaśca me śrutiśca me jyotiśca me suvaśca me prāṇaśca me'pānaśca me vyānaśca me'suśca me cittañ ca ma ādhītañ ca me vākca me manaśca me cakṣuśca me śrotrañ ca me dakṣaśca me balañ ca ma ojaśca me sahaśca ma āyuśca me jarā ca ma ātmā ca me tanūśca me śarma ca me varma ca me'ṅgāni ca me'sthāni ca me parūgṃṣi ca me śarīrāṇi ca me ||1||

jyaiṣṭhyañ ca ma ādhipatyañ ca me manyuśca me bhāmaśca me'maśca me'mbhaśca me jemā ca me mahimā ca me varimā ca me prathimā ca me varṣmā ca me drāghuyā ca me vṛddhañ ca me vṛddhiśca me satyañ ca me śraddhā ca me jagacca me dhanañ ca me vaśaśca me tviṣiśca me krīḍā ca me modaśca me jātañ ca me janiṣyamāṇañ ca me sūktañ ca me sukṛtañ ca me vittañ ca me vedyañ ca me bhūtañ ca me bhaviṣyacca me sugañ ca me supathañ ca ma ṛddhañ ca ma ṛddhiśca me kḷptañ ca me kḷptiśca me matiśca me sumatiśca me ||2||

śañ ca me mayaśca me priyañ ca me'nukāmaśca me kāmaśca me saumanasaśca me bhadrañ ca me śreyaśca me vasyaśca me yaśaśca me bhagaśca me draviṇañ ca me yantā ca me dhartā ca me kṣemaśca me dhṛtiśca me viśvañ ca me mahaśca me samvicca me jñātrañ ca me sūśca me prasūśca me sīrañ ca me layaśca ma ṛtañ ca me'mṛtañ ca me'yakṣmañ ca me'nāmayacca me jīvātuśca me dīrghāyutvañ ca me'namitrañ ca me'bhayañ ca me sugañ ca me śayanañ ca me sūṣā ca me sudinañ ca me ||3||

ūrkca me sūnṛtā ca me payaśca me rasaśca me ghṛtañ ca me madhu ca me sagdhiśca me sapītiśca me kṛṣiśca me vṛṣṭiśca me jaitrañ ca ma audbhidyañ ca me rayiśca me rāyaśca me puṣṭañ ca me puṣṭiśca me vibhu ca me prabhu ca me bahu ca me bhūyaśca me pūrṇañ ca me pūrṇatarañ ca me'kṣitiśca me kūyavāśca me'nnañ ca me'kṣucca me vrīhayaśca me yavāśca me māṣāśca me tilāśca me mudgāśca me khalvāśca me godhūmāśca me masurāśca me priyaṅgavaśca me'ṇavaśca me śyāmākāśca me nīvārāśca me ||4||

aśmā ca me mṛttikā ca me girayaśca me parvatāśca me sikatāśca me vanaspatayaśca me hiraṇyañ ca me'yaśca me sīsañ ca me trapuśca me śyāmañ ca me lohañ ca me'gniśca ma āpaśca me vīrudhaśca ma oṣadhayaśca me kṛṣṭapacyañ ca me'kṛṣṭapacyañ ca me grāmyāśca me paśava āraṇyāśca yajñena kalpantām vittañ ca me vittiśca me bhūtañ ca me bhūtiśca me vasu ca me vasatiśca me karma ca me śaktiśca me'rthaśca ma emaśca ma itiśca me gatiśca me ||5||

agniśca ma indraśca me somaśca ma indraśca me savitā ca ma indraśca me sarasvatī ca ma indraśca me pūṣā ca ma indraśca me bṛhaspatiśca ma indraśca me mitraśca ma indraśca me varuṇaśca ma indraśca me tvaṣṭā ca ma indraśca me dhātā ca ma indraśca me viṣṇuśca ma indraśca me'śvinau ca ma indraśca me marutaśca ma indraśca me viśve ca me devā indraśca me pṛthivī ca ma indraśca me'ntarikṣaṁ ca ma indraśca me dyauśca ma indraśca me diśaśca ma indraśca me mūrddhā ca ma indraśca me prajāpatiśca ma indraśca me ||6||

agṁśuśca me raśmiśca me'dābhyaśca me'dhipatiśca ma upāgṁśuśca me'ntaryāmaśca ma aindravāyavaśca me maitrāvaruṇaśca ma āśvinaśca me pratiprasthānaśca me śukraśca me manthī ca ma āgrayaṇaśca me vaiśvadevaśca me dhruvaśca me vaiśvānaraśca ma ṛtugrahāśca me'tigrāhyāśca ma aindrāgnaśca me vaiśvadevaśca me marutvatīyāśca me māhendraśca ma ādityaśca me sāvitraśca me sārasvataśca me pauṣṇaśca me pātnīvataśca me hāriyojanaśca me ||7||

idhmaśca me barhiśca me vediśca me dhiṣṇiyāśca me srucaśca me camasāśca me grāvāṇaśca me svaravaśca ma uparavāśca me'dhiṣavaṇe ca me droṇakalaśaśca me vāyavyāni ca me pūtabhṛcca ma ādhavanīyaśca ma āgnīdhrañ ca me havirdhānañ ca me gṛhāśca me sadaśca me puroḍāśāśca me pacatāśca me'vabhṛthaśca me svagākāraśca me ||8||

agniśca me gharmaśca me'rkaśca me sūryaśca me prāṇaśca me'śvamedhaśca me pṛthivī ca me'ditiśca me ditiśca me dyauśca me śakvarīraṅgulayo diśaśca me yajñena kalpantāmṛkca me sāma ca me stomaśca me yajuśca me dīkṣā ca me tapaśca ma ṛtuśca me vratañ ca me'horātrayorvṛṣṭyā bṛhadrathantare ca me yajñena kalpetām ||9||

garbhāśca me vatsāśca me tryaviśca me tryavī ca me dityavāṭ ca me dityauhī ca me pañcāviśca me pañcāvī ca me trivatsaśca me trivatsā ca me turyavāṭ ca me turyauhī ca me paṣṭhavāṭ ca me paṣṭhauhī ca ma ukṣā ca me vaśā ca ma ṛṣabhaśca me vehacca me'naḍvāñca me dhenuśca ma āyuryajñena kalpatām prāṇo yajñena kalpatāmapāno yajñena kalpatām vyāno yajñena kalpatāñ cakṣuryajñena kalpatāg śrotraṁ yajñena kalpatām mano yajñena kalpatām vāgyajñena kalpatāmātmā yajñena kalpatāṁ yajño yajñena kalpatām ||10||

ekā ca me tisraśca me pañca ca me sapta ca me nava ca ma ekādaśa ca me trayodaśa ca me pañcadaśa ca me saptadaśa ca me navadaśa ca ma ekavigṁśatiśca me trayovigṁśatiśca me pañcavigṁśatiśca me saptavigṁśatiśca me navavigṁśatiśca ma ekatrigṁśacca me trayastrigṁśacca me catasraśca me'ṣṭau ca me dvādaśa ca me ṣoḍaśa

ca me vigṁśatiśca me caturvigṁśatiśca me'ṣṭāvigṁśatiśca me dvātrigṁśacca me ṣaṭtrigṁśacca me catvārigṁśacca me catuścatvārigṁśacca me'ṣṭācatvārigṁśacca me vājaśca prasavaścāpijaśca kratuśca suvaśca mūrddhā ca vyaśñiyaścāntyāyanaścāntyaśca bhauvanaśca bhuvanaścādhipatiśca ||11||

iḍā devahūrmanuryajñanīrbṛhaspatirukthāmadāni śagṁsiṣadviśvedevās sūktavācaḥ pṛthivimātarmā mā higṁsīrmadhu manișye madhu janiṣye madhu vakṣyāmi madhu vadiṣyāmi madhumatīn devebhyo vācamudyāsagṁ śuśrūṣeṇyām manuṣyebhyastam mā devā avantu śobhāyai pitaro'numadantu ||